श्रीबटुकभैरवाष्टोत्तरशतनामस्तोत्रम्

॥ श्रीगणेशाय नमः ॥ श्रीउमामहेश्वराभ्यां नमः ॥ श्रीगुरवे नमः ॥ श्रीभैरवाय नमः ॥

विनियोगः

ॐ अस्य श्रीबटुकभैरवनामाष्टशतकस्य आपदुद्धारणस्तोमन्त्रस्य,
बृहदारण्यको नाम ऋषिः, श्रीबटुकभैरवो देवता, अनुष्टुप् छन्दः,
ह्रीं बीजम्, बटुकायेति शक्तिः, प्रणवः कीलकं, अभीष्टतां
सिद्धियर्थे जपे विनियोगः ॥
ह्रीं ह्रौं नमः शिवाय इति नमस्कार मन्त्रः ॥

॥ अथ ध्यानम् ॥

वन्दे बालं स्फटिकसदृशं कुण्डलोद्भासिवक्त्रं, दिव्याकल्पैर्नवमणिमयैः किङ्किणीनूपुराढ्यैः ।
दीप्ताकारं विशदवदनं सुप्रसन्नं त्रिनेत्रं, हस्ताग्राभ्यां वटुकमनिशं शूलदण्डौ दधानम् ॥
करकलितकपालः कुण्डली दण्डपाणिः, तरुणतिमिरनीलो व्यालयज्ञोपवीती ।
क्रतुसमयसपर्याविघ्नविच्छिप्तिहेतुः , जयति वटुकनाथः सिद्धिदः साधकानाम् ॥
शुद्धस्फटिकसङ्काशं सहस्रादित्यवर्चसम् । नीलजीमूतसङ्काशं नीलाञ्जनसमप्रभम् ॥
अष्टबाहुं त्रिनयनं चतुर्बाहुं द्विबाहुकम् । दशबाहुमथोग्रं च दिव्याम्बरपरिग्रहम् ॥
दंष्ट्राकरालवदनं नूपुरारावसङ्कुलम् । भुजङ्गमेखलं देवमग्निवर्णं शिरोरुहम् ॥
दिगम्बरमाकुरेशं बटुकाख्यं महाबलम् । खट्वाङ्गमसिपाशं च शूलं दक्षिणभागतः ॥
डमरुं च कपालं च वरदं भुजगं तथा । आत्मवर्णसमोपेतं सारमेयसमन्वितम् ॥

॥ मूलमन्त्रः ॥

ॐ ह्रीं बटुकायापदुद्धारणाय कुरु कुरु बटुकाय ह्रीं ॐ

॥ अथ स्तोत्रम् ॥

ॐ ह्रीं भैरवो भूतनाथश्च भूतात्मा भूतभावनः । क्षेत्रदः क्षेत्रपालश्च क्षेत्रज्ञः क्षत्रियो विराट् ॥ १॥
श्मशानवासी मांसाशी खर्पराशी स्मरान्तकः । रक्तपः पानपः सिद्धः सिद्धिदः सिद्धसेवितः ॥ २॥
कङ्कालः कालशमनः कलाकाष्ठातनुः कविः । त्रिनेत्रो बहुनेत्रश्च तथा पिङ्गललोचनः ॥ ३॥
शूलपाणिः खड्गपाणिः कङ्काली धूम्रलोचनः । अभीरुर्भैरवीनाथो भूतपो योगिनीपतिः ॥ ४॥
धनदोऽधनहारि च धनवान् प्रतिभानवान् । नागहारो नागपाशो व्योमकेशो कपालभृत् ॥ ५॥

कालः कपालमालि च कमनीयः कलानिधिः । त्रिलोचनो ज्वलन्नेत्रस्त्रिशिखी च त्रिलोकपः ॥ ६॥
त्रिनेत्रतनयो डिम्भः शान्तः शान्तजनप्रियः । बटुको बटुवेशश्च खड्गाङ्गवरधारकः ॥ ७॥
भूताध्यक्षो पशुपतिर्भिक्षुकः परिचारकः । धूर्तो दिगम्बरः शूरो हरिणः पाण्डुलोचनः ॥ ८॥
प्रशान्तः शान्तिदः शुद्धः शङ्करप्रियबान्धवः । अष्टमूर्तिर्निधीशश्च ज्ञानचक्षुस्तपोमयः ॥ ९॥
अष्टाधारः षडाधारः सर्पयुक्तः शिखीसखः । भूधरो भुधराधीशो भूपतिर्भूधरात्मजः ॥ १०॥
कङ्कालधारी मुण्डी च आन्त्रयज्ञोपवीतवान् । जृम्भणो मोहनः स्तम्भी मारणः क्षोभणस्तथा ॥ ११॥
शुद्धनीलाञ्जनप्रख्यो दैत्यहा मुण्डविभूषितः । बलिभुग् बलिभुङ्नाथो बालोऽबालपराक्रमः ॥ १२॥
सर्वापत्तारणो दुर्गो दुष्टभूतनिषेवितः । कामी कलानिधिः कान्तः कामिनीवशकृद्वशी ॥ १३॥
जगद्रक्षाकरोऽनन्तो मायामन्त्रौषधीमयः । सर्वसिद्धिप्रदो वैद्यः प्रभविष्णुरितीव हि ह्रीं ॐ ॥ १४॥

फलश्रुतिः ।

अष्टोत्तरशतं नाम्नां भैरवाय महात्मनः । मया ते कथितं देवि रहस्यं सर्वकामदम् ॥ १५॥
य इदं पठति स्तोत्रं नामाष्टशतमुत्तमम् । न तस्य दुरितं किञ्चिन्न रोगेभ्यो भयं भवेत् ॥ १६॥
न च मारीभयं किञ्चिन्न च भूतभयं क्वचित्। न शत्रुभ्यो भयं किञ्चित्प्राप्नुयान्मानवः क्वचित्॥१७॥
पातकेभ्यो भयं नैव यः पठेत्स्तोत्रमुत्तमम् । मारीभये राजभये तथा चौराग्निजे भये ॥ १८॥
औत्पत्तिके महाघोरे तथा दुःखप्रदर्शने । बन्धने च तथा घोरे पठेत्स्तोत्रमनुत्तमम् ॥ १९॥
सर्वं प्रशममायाति भयं भैरवकीर्तनात् । एकादशसहस्रं तु पुरश्चरणमुच्यते ॥ २०॥
यस्त्रिसन्ध्यं पठेद्देवि संवत्सरमतन्द्रितः । स सिद्धिं प्राप्नुयादिष्टां दुर्लभामपि मानवः ॥ २१॥
षण्मासं भूमिकामस्तु जपित्वा प्राप्नुयान्महीम् । राजशत्रुविनाशार्थं पठेन्मासाष्टकं पुनः ॥ २२॥
रात्रौ वारत्रयं चैव नाशयत्येव शात्रवान् । जपेन्मासत्रयं मर्त्यो राजानं वशमानयेत् ॥ २३॥
धनार्थी च सुतार्थी च दारार्थी चापि मानवः । पठेन् मासत्रयं देवि वारमेकं तथा निशि ॥ २४॥
धनं पुत्रं तथा दारान्प्राप्नुयान्नात्र संशयः । रोगी भयात्प्रमुच्येत बद्धो मुच्येत बन्धनात् ॥ २५॥
भीतो भयात्प्रमुच्येत देवि सत्यं न संशयः । निगडिश्चापि बद्धो यः कारागेहे निपातितः ॥ २६॥
शृङ्खलाबन्धनं प्राप्तं पठेच्चैव दिवानिशि । यं यं चिन्तयते कामं तं तं प्राप्नोति निश्चितम् ।
अप्रकाश्यं परं गुह्यं न देयं यस्य कस्यचित् ॥ २७॥
सुकुलीनाय शान्ताय ऋजवे दम्भवर्जिते । दद्यात्स्तोत्रमिमं पुण्यं सर्वकामफलप्रदम् ॥ २८॥
जजाप परमं प्राप्यं भैरवस्य महात्मनः । भैरवस्य प्रसन्नाभूत्सर्वलोकमहेश्वरी ॥ २९॥
भैरवस्तु प्रहृष्टोऽभूत्सर्वगः परमेश्वरः । जजाप परया भक्त्या सदा सर्वेश्वरेश्वरीम् ॥ ३०॥

॥ इति श्रीबटुकभैरवाष्टोत्तरशतनामस्तोत्रम् सम्पूर्णम् ॥